संस्कृत

प्रयोग - स्मार्त

क्र. नं. ११२

पुण्याहवाचन

३०१

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥अथपुण्याहवाचनप्रारंभः॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(२)

पू० १ ॥श्रीगणेशायनमः॥ श्रीमन्महा० ॥आचम्यपवित्रपाणिः प्राणानायम्य॥ बा०
येभ्योमातामधुमत्पिन्वतेपयः पीयूषंद्यौरदितिरद्रिबर्हाः॥उक्थशुष्मान्वृष
भरान्स्वप्नसस्तांआदित्यांअनुमदास्वस्तये॥एवापित्रेविश्वदेवायवृष्णेयज्ञै
र्विधेमनमसाहविर्भिः॥बृहस्पतेसुप्रजावीरवंतोवयंस्यामपतयोरयिणां॥
यावंतीवैदेवतास्तासर्वावेदविदिब्राह्मणेवसंति॥तस्माब्राह्मणेभ्योवेदवि
द्भ्योदिवेदिवेनमस्कुर्यान्नाश्लीलंकीर्तयेदेताएवदेवताःप्रीणाति॥उत्तरेक
र्मण्यनिर्विघ्नमस्तु॥ समुखश्चेत्यादिशुभपुण्यतिथौममआत्मनःश्रुति
स्मृतिपुराणोक्तफलप्राप्त्यर्थंअमुककर्मारम्भंतंगणपतिपूजनपूर्वकंस्व १
स्तिपुण्याहवाचनमातृकापूजनंनांदीश्राद्धंग्रहयज्ञंमंडपःप्रतिष्ठा कुरु

"Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(2A)

देवतादिस्थापनपूजनं करिष्ये ॥ गणानां त्वा शौनको गणाधिपतिर्जग
ती ॥ गणपत्यावाहने विनियोगः ॥ ॐ गणानां त्वा गणपतिं हवामहे कविं
कवीनामुपमश्रवस्तमं ॥ ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिः
सीद सादनं ॥ ऋद्धिबुद्धिसहितं गणपतिमावाहयामि ॥ गणपतये नमः आ
सनं समर्पयामि ॥ पाद्यं० ॥ आचमनीयं० ॥ अर्घ्यं० ॥ स्नानानंतर आचमनी
यं० ॥ वस्त्रं० यज्ञोपवीतं० ॥ गंधं० ॥ पुष्पं० ॥ धूपं० ॥ दीपं० नैवेद्यं० ॥ आचमनी
यं० फलं० तांबूलं० ॥ कृतायाः पूजायाः साद्गुण्यार्थे दक्षिणां समर्पयामि ॥ नि
षुसीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनां ॥ न ऋते त्वत्क्रियते किंचना
रे महामर्कं मघवं चित्रमर्च ॥ गणपतये नमः ॥ मंत्रपुष्पांजलिं समर्पयामि

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(3)

पू० २

वक्रतुंड महाकाय सूर्यकोटि सम प्रभ ॥ निर्विघ्नं कुरु मे देव सर्व कार्येषु स वा०
र्वदा ॥ १ ॥ विघ्नान्नाशाय मे नित्यं विद्यासागर मेव च ॥ त्वत्प्रसादेन कार्या
णि सर्वाणि हि करोम्यहं ॥ २ ॥ शत्रूणां बुद्धिनाशोस्ति मित्राणामुदयं कुरु ॥
इति स्मा प्यं दे वेश प्रणिपत्य पुनः पुनः ॥ अनया पूजा निर्विघ्नहर्ता महागण
ति प्रीयतां ॥ ३ ॥ ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां ॥ पिपृतां नो
भरीमभिः ॥ ओषधयः संवदंते सोमेन सह राज्ञा ॥ यस्मै कृणोति ब्राह्मणस्तं
राजन्पारयामसि ॥ आकलशेषु धावति पवित्रे परिषिच्यते ॥ उक्थैर्यज्ञेषु
वर्धते ॥ इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या ॥ असि २
क्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥ गंधद्वारां दुराधर्षां

(3A)

नित्यपुष्टांकरिषिणीं ॥ ईश्वरींसर्वभूतानां तामिहोपह्वयेश्रीयं ॥ याओषधीः
पूर्वीजातादेवेभ्यस्त्रियुगंपुरा ॥ मनैनुबभ्रूणामहंशतंधामानिसप्तच ॥
कांडात्कांडात्प्ररोहंतीपरुषःपरुषपरि ॥ एवानोदूर्वेप्रतनुसहस्रेणशतेन
च ॥ अश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता ॥ गोभाजइत्किलासथयत्सन
वथपूरुषं ॥ स्योनापृथिवीभवानृक्षरानिवेशनी ॥ यछानःशर्मसप्रथः ॥
याःफलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानो
मुंचंत्वंहसः ॥ सहिरत्नानिदाशुषेसुवातिसविताभगः ॥ तंभागंचित्रमी
महे ॥ हिरण्यरूपःसहिरण्यसंदृगपान्नपात्सेदुहिरण्यवर्णः ॥ हिरण्यया
त्परियोनेर्निषद्याहिरण्यदादददत्यन्नमस्मै ॥ सुवासःसुवासाःपरिवीतआ

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(1)

पु०
३

गात्सुश्रेयान्भवतिजायमानः॥ तंधीरासःकवयउन्नयंतिस्वाध्यो३मनसादे गा०
वयंतः॥ पूर्णादर्विपरापतसुपूर्णापुनरापत॥ वस्नेवविक्रीणावहाइषमूर्जंशत
क्रतो॥ तत्वायामिशुनःशेपोवरुणस्त्रिष्टुप्॥ वरुणावाहनेविनियोगः॥ ॐ तत्वा
यामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः॥ अहेळमानोवरुणेहबो
ध्युरुशंसमानआयुःप्रमोषीः॥ उत्तरकलशेवरुणमावाहयामि॥ वरुणायन
मः॥ आसनं॥ अनेनवरुणपूजनेनप्री०॥ नांपुण्याहवाचनेचैवयःकुर्यात्क
लशार्चनं॥ दक्षिणस्थस्थिरश्चैवउत्तरस्थश्चरस्तथा॥ नचालयेद्दक्षिणस्थ
उत्तरस्थस्तुचालयेत्॥ अन्यथाधर्महानिःस्यादेषधर्मःसनातनः॥ कलश ३
स्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः॥ मूलेतत्रस्थितोब्रह्मामध्येमातृगणा

(5A)

स्मृतः॥ कुक्षौतुसागराः सर्वेसप्तद्वीपावसुंधरा॥ ऋग्वेदोथयजुर्वेदः सामवे
दोह्यथर्वणः॥ अंगैश्चसहिताः सर्वेकलशंतुसमाश्रिताः॥ अत्रगायत्रीसावित्री
शांतिः पुष्टिकरी तथा॥ आयांतुममशांत्यर्थंदुरितक्षयकारकाः॥ सर्वेसमुद्राः
सरितस्तीर्थानिजलदानदाः॥ आयांतुममशांत्यर्थंदुरितक्षयकारकाः॥ मा
तृदेवोभव॥ पितृदेवोभव॥ आचार्यदेवोभव॥ अतिथिदेवोभव॥ आशिषः
प्रार्थयंते॥ प्रार्थनामहाः॥ एताः सत्याआशिषः संतु॥ ततः॥ अवनिकृतजा
नुमंडलकमलमुकुलसदृशामंजलींशिरस्याधायदक्षिणेनपाणिनास्वु
र्णपूर्णकलशंधारयित्वा॥ दीर्घानागानद्योगिरयः स्त्रीणिविष्णुपदानिचते
नायुः प्रमाणेनपुण्याहंदीर्घमायुरस्तु॥ शिवाआपः संतु॥ सौमनस्यमस्तु॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5)

पु० अक्षतंचारिष्टंचास्तु॥ गंधाःपांतुसुमंगल्यंचास्तु॥ अक्षताःपांतुआयुष्यम पा०
६ स्तु॥ पुष्पाणिपांतुसौश्रियमस्तु॥ तांबूलानिपांत्वैश्वर्यमस्तु॥ दक्षिणाःपां
तुबहुदेयंचास्तु॥ दीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्तु॥ श्रीर्यशोविद्यावि
नयोवित्तंबहुपुत्रंचायुष्यंचास्तु॥ यंकृत्वासर्ववेदयज्ञक्रियाकरणकर्मारं
भाःशुभाःशोभनाःप्रवर्त्तंतेतं॥ महमोंकारमादिंकृत्वाऋग्यजुःसामाशी
र्वचनंबहुऋषिमतंसंविज्ञातंभवद्भिरनुज्ञातःपुण्यंपुण्याहंवाचयिष्ये॥ वाच्य
तां॥ ॐ भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः॥ स्थिरैरंगै
स्तुष्टुवांसस्तनूभिर्व्यशेमदेवहितंयदायुः॥ द्रविणोदाद्रविणसस्तुरस्यद्रविणो ६
दाःसनरस्यप्रयंसत्॥ द्रविणोदावीरवतीमिषंनोद्रविणोदारासतेदीर्घमायुः॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai — Joint project of the

(5A)

सवितापश्चातात्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ॥ सविता
नः सुवतु सर्वतातिं सविता नो रासतां ॥ दीर्घमायुः ॥ नवोनवोभवतिजाय
मानोह्नांकेतुरुषसामेत्ययं ॥ भागंदेवेभ्योविदधात्यायन्प्रचंद्रमास्तिरते
दीर्घमायुः ॥ उच्चादिविदक्षिणावंतोऽअस्थुर्येअश्वदाः सहतेसूर्येण ॥
हिरण्यदाऽअमृतत्वंभजंतेवासोदाः सोमप्रतिरंतआयुः ॥ आपृउदंतु
जीवसेदीर्घायुत्वायवर्चसे ॥ यस्त्वाहृदाकीरिणामन्यमानोमर्त्यंमर्त्यो
जोहवीमि ॥ जातवेदोयशोऽअस्मासुधेहिप्रजाभिरग्नेऽअमृतत्वमश्यां ॥
यस्मैत्वंसुकृतेजातवेदउलोकमग्नेकृणवः स्योनं ॥ अश्विनंसपुत्रिणं
वीरवंतंगोमंतंरयिंनशतेस्वस्ति ॥ संत्वासिंचामियजुषाप्रजामायुर्धनं ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6)

पु० च॥ व्रतनियम तपः स्वाध्यायक्रतु दमदान विशिष्टानां ब्राह्मणानां मनः समाधी षा०
५ यतां॥ समाहितमनसस्मः॥ प्रसीदंतु भवंतः॥ प्रसन्नास्मः शांतिरस्तु॥ पुष्टि
रस्तु॥ तुष्टिरस्तु॥ वृद्धिरस्तु अविघ्नमस्तु॥ आयुष्यमस्तु॥ आरोग्यमस्तु॥
शिवं कर्मास्तु॥ कर्मसमृद्धिरस्तु धर्मसमृद्धिरस्तु॥ वेदसमृद्धिरस्तु॥ शास्त्र
समृद्धिरस्तु॥ पुत्रसमृद्धिरस्तु॥ धनधान्यसमृद्धिरस्तु॥ इष्टसंपदस्तु॥ बहिः
अरिष्टनिरसनमस्तु॥ यत्पापं तत्प्रतिहतमस्तु॥ यच्छ्रेयस्तदस्तु॥ उत्तरेक
र्मण्यविघ्नमस्तु॥ उत्तरोत्तरमहरहरभिवृद्धिरस्तु॥ उत्तरोत्तराः क्रियाः शुभाः
शोभनाः संपद्यंतां॥ तिथिकरणमूहूर्तनक्षत्रसंपदस्तु॥ तिथिकरणमूहूर्त ५
नक्षत्रग्रहग्रहलग्नाधिदेवताः प्रीयंतां॥ तिथिकरणेमूहूर्तेनक्षत्रेसग्रहे

(6A)

सदैवतेप्रीयेतां दुर्गापांचाल्योप्रीयेतां ॥ अग्निपुरोगाविश्वेदेवाः प्रीयंतां ॥ इंद्रपुरो
गामरुद्गणाः प्री० ॥ ब्रह्मपुरोगाः सर्वेवेदाः सर्ववेदाः प्री० ॥ विष्णुपुरोगासर्वेदेवाः
प्रीयंतां ॥ महेश्वरीपुरोगाउमामातरप्री० ॥ वसिष्ठपुरोगाऋषिगणाः प्री० ॥ अ
रुंधतीपुरोगाएकपत्न्यः प्री० ॥ ऋषयः छंदांस्याचार्यावेदा यज्ञाश्चप्री० ॥ ब्र देवा ४
ह्मचब्राह्मणाश्चप्री० ॥ श्रीसरस्वत्यौप्रीयेतां ॥ श्रद्धामेधेप्रीयेतां । भगवतीका
त्यायनीप्रीयेतां ॥ भगवतीमाहेश्वरीप्री० ॥ भगवतीपुष्टिकरीप्री० ॥ भगवती
तुष्टिकरीप्री० ॥ भगवतीऋद्धिकरीप्री० ॥ भगवतीवृद्धिकरीप्री० ॥ भगवंतो
विघ्नविनायकौप्रीयेतां ॥ भगवान्स्वामीमहासेनः सपत्नीकः ससुतः सपा
र्षदः सर्वस्थानगतः प्रीयंतां ॥ हरिहरहिरण्यगर्भाः प्रीयंतां ॥ सर्वाग्रामदेव

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(७)

पु० ताः प्रीयंतां॥ सर्वाः कुलदेवताः प्री०॥ बहिः हस्तब्रह्मद्विषः। हताः परिपंथिनः हता वा०
अस्य कर्मणो विघ्नकर्त्तारः शत्रवः पराभवं यांतु॥ शाम्यंतु घोराणि॥ शाम्यंतु पा
ध पानि॥ शाम्यंत्वितयः॥ आतः शुभानि वर्द्धंतां॥ शिवा आपः संतुः॥ शिवा ऋतवः॥
शिवा अग्नयः॥ शिवा आहुतयः॥ शिवा ओषधयः॥ शिवा वनस्पतयः॥ शिवा
अतिथयः॥ अहोरात्रे शिवे स्यातां॥ नकामे निकामेन पर्जन्यो वर्षतु॥ फलवत्यो
न ओषधयः पच्यंतां॥ योगक्षेमो नः कल्पतां॥ शुक्रांगारकबुधबृहस्पति
शनैश्चरराहुकेतुसोमसहित आदित्यपुरोगाः सर्वे ग्रहाः प्रीयंतां। भगवान्ना
रायणः प्रीयतां॥ भगवान्पर्जन्यः प्रीयतां॥ भगवान्स्वामीमहासेनः पुण्याहका
लान्वाचयिष्ये॥ वाच्यतां॥ ॐ उद्गाने व शाकुने साम गायसि ब्रह्मपुत्र इव स ध

(7A)

वेनेषु शंसस्सि॥ वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमावद विश्व
तो नः शकुने पुण्यमावद॥ याज्ययाय जातिप्राप्तिर्वै याज्या पुण्यैव लक्ष्मीः पुण्या
मेव लक्ष्मीं संभावयाति पुण्यां लक्ष्मीं संस्कुरुते॥ यत्पुण्यं नक्षत्र तद्वट्कुर्वीतो
पव्युषं॥ यदा वै सूर्य उदेति॥ अथ नक्षत्रं नैति॥ यावति तत्र सूर्यो गच्छेत्॥ यत्र
जघन्यं पश्येत्॥ तावति कुर्वीत यत्कारी स्यात्॥ पुण्याह एव कुरुते॥ तानि वा
एतानि यमनक्षत्राणि॥ यान्येव देवनक्षत्राणि॥ तेषु कुर्वीत यत्कारी स्यात्॥
पुण्याह एव कुरुते॥ मह्यं सकुडुंबिने महाजनान्नमस्कुर्वाणायाशीर्वचन
मपेक्षमाणायामुककर्मणः पुण्याहं भवंतो ब्रुवंतु॥ पुण्याहादेस्त्रिरभ्यासे
मंदमध्योच्चानिस्वनैः त्रिर्वदेत्॥ तथैव ओं पुण्याहमिति त्रिर्विप्राः। ॐ स्व
स्तयेवायुमुपब्रवामहे सोमंस्वस्ति भुवनस्य यस्पतिः॥ बृहस्पतिं सर्वगणं स्व

(8)

पु० स्तयेस्वस्तय आदित्यासो भवंतु नः ॥ आदित्य उदयनीयः पथ्यैयैवेतः स्व वा०
७ स्त्याप्रयंति पथ्यां स्वस्तिमभ्यकयंति स्वस्त्येवेतः प्रयंति स्वस्त्युद्यंति स्वस्त्युद्यं
ति ॥ ॐ स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नउस्तार्क्ष्यो
अरिष्टनेमि स्वस्ति नो बृहस्पतिर्दधातु ॥ अष्टौदेवावसवः सोम्यासः चतस्रो
देवीरजराः श्रविष्ठाः ॥ तेयज्ञं पांतु रजसः पुरस्तात् संवत्सरीणममृतं
स्वस्ति मह्यामित्यादिकर्मण इत्यंतं पूर्ववत् । स्वस्तिभवंतोब्रुवंत्विति तान्निः
ॐ आयुष्मते स्वस्तीति प्रतिवचनं नाग्नेः ॥ ॐ ऋध्याम स्तोमं सनुयाम
वाजमानो मंत्रं सरथेहोपयातं ॥ यशो न पक्वं मधु गोष्वंतराभूतांशो अ ७
श्विनोः काममप्राः सर्वामृद्धिमृध्यकयामिति तं वै तेजसे वपुरस्तात्सर्य

(8A)

भवच्छंदोभिर्मध्यतोक्षरैरुपरिष्टाद्गायत्र्यासर्वतोद्वादशाहंपरिभूयस
र्वामृद्धिमार्ध्नोत्सर्वामृद्धिमृध्नोति यएवंवेद॥ ऋध्यास्महव्यैर्नमसोपस
द्य॥ मित्रंदेवमित्रधेयंनोअस्तु अनूराधान्हविषावर्द्धयंतः॥ शतंजीवे
मशरदः सवीराः॥ त्रिणि त्रीणि वै देवानामृद्धानि। त्रीणिछंदांसि त्रीणि
सवनानि त्रयइमेलोकाः। ऋध्यामेवतद्वीर्यएषुलोकेषुप्रतितिष्ठति॥
मह्यामित्यादिकर्मणइत्यंतंत्र्यंबकंभवंतोब्रुवंत्विति त्रि॥ कर्मऋध्यतामि
ति त्रिः॥ ॐ श्रियेजातःश्रियआनिरियायश्रियंवयोजरितृभ्योदधाति॥
श्रियंवसानाअमृतत्वमायन्भवंतिसत्यासमिथामितद्रौ॥ श्रियएवै
नंतच्छ्रियामादधाति संततमृचावषट्कृत्य संतत्यैसंधीयते प्रजया

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(९)

पु० पशुभिर्यएवंवेद॥ यास्मिन्ब्रह्माभ्यजयत्सर्वमितत्॥ अमुंचलोकमिदमूचसर्वं॥ वा०

८ तन्नोनक्षत्रमभिजिद्विजित्य॥ श्रियंदधात्वहृणीयमानं। अहिर्बुध्नियमंत्रंमे

गोपाय॥ यमृषयस्त्रैविद्याविदुः। ऋचःसामानियजूंषि॥ साहिश्रीरमृता २

सतां॥ मह्यमित्यादि०॥ श्रीरस्त्वितिभवंतोब्रुवंत्वितित्रिः॥ अस्तुश्रीरितित्रिः

वर्षशतंपूर्णमस्तु॥ गोत्राभिवृद्धिरस्तु॥ प्रजापतिःप्रीयतां॥ ॐशुक्रेभि

रंगैरजआततन्वान्क्रतुंपुनानःकविभिःपवित्रैः॥ शोचिर्वसानःपर्यायुर

पांश्रियोमिमीतेबृहतीरनूनाः। तद्येषश्लोकोभिगीतोमरुतःपरिवेष्टा

रोमरुत्तस्यावसन्गृहे॥ आविक्षितस्यकामप्रेर्विश्वेदेवाःसभासदइति। ८

ततःउत्तरकलशंदक्षिणहस्तेदक्षिणकलशंवामहस्तेगृहीत्वाताभ्यांधारा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(९A)

हूयं संनतं पात्रे निषिंचेदेभिर्मंत्रैः ॥ ॐ वास्तोष्पते प्रति जानीह्यस्मान्स्वावेशो
अनमीवो भवा नः ॥ यत्वेमहे प्रति तन्नो जुषस्व शंनो भव द्विपदे शं चतुष्पदे ॥
वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिंदो ॥ अजरासस्ते सख्ये
स्याम पितेव पुत्रान्प्रति नो जुषस्व । वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्व
या गातुमत्या ॥ पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ॥ अमीव
हा वास्तोष्पते विश्वा रूपाण्याविशन् ॥ सखा सुशेव एधि नः ॥ शिवं शिवं ॥ ३ ॥
अभिषेके पत्नी वामतः ॥ ॐ समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यंत्य
निविशमानाः ॥ इंद्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवंतु ॥ या आपो
दिव्या उत वा स्रवंति खनित्रिमा उत वा याः स्वयंजाः । समुद्रार्था याः शुचयः पा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the ... Mumbai

(१०)

पु० वकास्तापो०यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यञ्जनानां॥मधु पुन्वा०
श्चुतःशुचयोयाःपावकास्तापो०॥यासुराजावरुणोयासुसोमोविश्वेदेवा
यासूर्जंमदंति॥वैश्वानरोयास्वग्निःप्रविष्टस्ताआ०॥त्रायंतामिहदेवास्त्राय
तांमरुतांगणः॥त्रायंतांविश्वाभूतानियथायमरपाअसत्॥आपइद्वाउभे
षजीरापोअमीवचातनीः॥आपःसर्वस्यभेषजीस्तास्तेकृण्वंतुभेषजं॥ह
स्ताभ्यांदशशाखाभ्यांजिह्वावाचःपुरोगवी॥अनामयित्नुभ्यांत्वाताभ्यांत्वो
पस्पृशामसि॥इमाआपःशिवतमाइमाःसर्वस्यभेषजीः॥इमाराष्ट्रस्य
वर्द्धनीरिमाराष्ट्रभृतोमृताः॥याभिरिंद्रमभ्यषिंचत्प्रजापतिःसोमंराजा
नंवरुणंयमंमनुं॥ताभिरद्भिरभिषिंचामित्वामहंराज्ञांत्वमधिराजोभवे

(10A)

ह॥ महांतंत्वामहीनां सम्राजंचर्षणीनांदेवीजनित्र्यजीजनद्भद्राजनित्र्य
जीजनत्॥ देवस्यत्वासवितुप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांअश्विनो
र्भैषज्येनतेजसेब्रह्मवर्चसायाभिषिंचामि॥ देवस्येत्वा॰ स्ताभ्यांसरस्वत्यै
र्भैषज्येनवीर्यायान्नाद्यायाभिषिंचामि॥ देव॰ स्ताभ्यांमिंद्रस्येंद्रियेणाश्रि
यैयशसेबलायाभिषिंचामि॥ देव॰ स्ताभ्यां॰ सरस्वत्यैवाचोयंतुर्यंत्रेणा
म्रा ग्नेस्त्वासांराज्येनाभिषिंचामिंद्रस्य॰ बृहस्पतेस्त्वासांराज्येनाभिषिंचामि॥
भूर्भुवस्वः अमृताभिषेकोस्तु॥ शांतिः पुष्टिस्तुष्टिश्चास्तु॥ इंद्रियंवाएतदस्मिं
लोकेयद्दधियद्दध्नाभिषिंचातींद्रियमेवास्मिंस्तद्दधातिरसोवाएषओषधि
वनस्पतिषुयंमधुयंमध्वाभिषिंचतिरसमेवास्मिंस्तद्दधातितेजोवायेतत्प

(11)

पु० भूनांयद्धुतंयद्धुतेनाभिषिंचतितेजएवास्मिंस्तद्दधात्यमृतंवाएतदस्मिंल्लो वा०
१० केयदापोयदद्भिरभिषिंचत्यमृतत्वमेवास्मिंस्तद्दधातिसोऽभिषिक्तोऽभिषेक्त्रे
ब्राह्मणायहिरण्यंदद्यात्सहस्रंदद्यात्क्षेत्रंचतुष्पाद्दद्यादथाप्याहुरसंख्यात
मेवापरिमितंदद्यादपरिमितोवैक्षत्रियोऽपरिमितस्यावरुध्याइत्यथास्मैसु
राकंसंहस्तआदधातिस्वादिष्ठयामदिष्ठयापवस्वसोमधारया॥इंद्रायपा
तवेसुतइतितांपिबेद्यदत्राशिष्टंरसिनःसुतस्ययदिंद्रोअपिबच्छचीभिः॥
इदंतदस्यमनसाशिवेनसोमंराजानमिहभक्षयामि॥अभित्वावृषभा
सुतेसुतंसृजामिपीतये॥तृंपाव्यश्नुहीमदमितियोहवावसोमपीथः १०
सुरायांप्रविष्टःसहैवैतेनैंद्रेणमहाभिषेकेणाभिषिक्तस्यक्षत्रियस्यभ

"Contribution of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com